# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा – दिसम्बर, २०१८

| | | |
|---|---|---|
| **कक्षा**– आचार्यप्रथमवर्षम् (SEM-1) | **प्रश्नपत्रम् – ३** (New) | **गुणा:** – ७० |
| **विषय:** – नव्यव्याकरणम् | **कोड– CC – 4.1.2** | **समय:** – २ त: ५ |
| **दिनाङ्क:** – १७/१२/२०१८ | **सन्दर्भग्रन्थ:**– प्रौढमनोरमा | |

**॥ प्रथमान्विति: ॥**

**प्र–१ कस्यापि एकस्य सङ्क्षिप्तमुत्तरं लेख्यम् ।** ०५

**ध्यायं ध्यायं परब्रह्म स्मारं स्मारं गुरोर्गिर: ।**

**सिद्धान्तकौमुदीव्याख्यां कुर्म: प्रौढमनोरमाम् ॥** इति ग्रन्थस्य मङ्गलाचरणं व्याख्यात ।

अथवा

कृष्णैकत्वम् इत्यत्र गङ्गोदकम् इत्यत्र च क्रमश: त्रिमात्रिक: ऐकार: ओकारश्च किमर्थं न प्राप्नुत: इति विवेचयत ।

**प्र–२ कस्यापि एकस्य विस्तृतमुत्तरं लेख्यम् ।** १०

**नाज्झलौ** इति सूत्रं मनोरमादिशा व्याख्येयम् ।

अथवा

**भूवादयो धातव:** इति सूत्रं मनोरमादिशा व्याख्येयम् ।

**॥ द्वितीयान्विति: ॥**

**प्र–३ कस्यापि एकस्य सङ्क्षिप्तमुत्तरं लेख्यम् ।** ०५

**मिदचोऽन्त्यात् पर:** इति सूत्रं मनोरमानुगुणं व्याख्येयम् ।

अथवा

तेन चेता, स्तोता इत्यत्र प्रमाणत: आन्तर्यवान् अकार: न इति भाव: इति ग्रन्थपङ्क्ति: ससन्दर्भं व्याख्येया ।

**प्र–४ कस्यापि एकस्य विस्तृतमुत्तरं लेख्यम् ।** १०

**स्थानिवदादेशोऽनल्विधौ** इति सूत्रं ग्रन्थोक्तरीत्या व्याख्येयम् ।

अथवा

**परनित्यान्तरङ्गापवादानामुत्तरोत्तरं बलीय:** इति परिभाषा सोदाहरणं व्याख्येया ।

**॥ तृतीयान्विति: ॥**

**प्र–५ कस्यापि एकस्य सङ्क्षिप्तमुत्तरं लेख्यम् ।** ०५

**स्तो: श्चुना श्चु: इति सुवचम्** इति ग्रन्थपङ्क्ति: ससन्दर्भं व्याख्येया ।

अथवा

**उभयनिर्देशे पञ्चमीनिर्देशो बलीयान् परत्वात् इत्यभिप्रेत्य आह सस्य** इति ग्रन्थपङ्क्तिम् इमां ससन्दर्भं व्याख्यात।

**प्र-६ कस्यापि एकस्य विस्तृतमुत्तरं लेख्यम्।** १०

**शि तुक्** इति सूत्रं ग्रन्थोक्तदिशा व्याख्येयम्।

अथवा

**ङमो ह्रस्वादचि ङमुण्णित्यम्** इति सूत्रं ग्रन्थोक्तदिशा व्याख्येयम्।

**॥ चतुर्थान्वितिः ॥**

**प्र-७ कस्यापि एकस्य सङ्क्षिप्तमुत्तरं लेख्यम्।** ०५

**हलि सर्वेषाम्** इति सूत्रं ग्रन्थोक्तदिशा व्याख्येयम्।

अथवा

**पूर्वत्रासिद्धे नास्ति विप्रतिषेधोऽभावादुत्तरस्य** इति शास्त्रपङ्क्तिः सोदाहरणं स्पष्टीकर्तव्या।

**प्र-८ कस्यापि एकस्य सूत्रस्य ग्रन्थोक्तदिशा व्याख्या विधेया।** १०

ससजुषो रुः।

अथवा

भोभगोअघोअपूर्वस्य योऽशि।

**प्र-९ केषामपि दशानाम् एकैकवाक्यैः उत्तराणि लेख्यानि।** १०

१. माहेश्वरसूत्रेषु कः वर्णः द्विरुपात्तः ?
२. हलन्त्यम् इत्यत्र कः समासः ?
३. आदिरन्त्येन सहेता इत्यत्र किं पदद्वयम् अनुवृत्त्या लभ्यते ?
४. उपदेशः इति पदे कः प्रत्ययः ?
५. को नाम उपदेशः ?
६. अनुनासिक-शब्दस्य विग्रहः कथं प्रदर्शितः ग्रन्थकारेण ?
७. ह्रस्वदीर्घप्लुतः इत्येषः कीदृशः समासः ?
८. इको गुणवृद्धी इति सूत्रे के पदे अनुवर्तेते ?
९. मिदचोऽन्त्यात् परः इति सूत्रे अचः इत्यत्र षष्ठी कम् अर्थं बोधयति ?
१०. स्थानेयोगा इत्यस्य समासस्य विग्रहः ग्रन्थकारेण कथं दर्शितः ?
११. तस्मादित्युत्तरस्य आदेः इति एकमेव सूत्रं कस्मात् न कृतम् ?
१२. धात्रंशः इति प्रयोगे रेफस्य द्वित्वं भवति न वा ?
१३. षट् सन्तः इत्यत्र सन्धौ कृते कति रूपाणि सम्भवन्ति ?
१४. व्योर्लघुप्रयत्नतरः शाकटायनस्य इत्यत्र लघुप्रयत्नतरः इत्यस्य अर्थः ग्रन्थकारेण कः उक्तः ?
१५. हलि सर्वेषाम् इति सूत्रेण कस्य वर्णस्य लोपो भवति ?